# અશ્વત્થસ્તોત્રમ્

ashvattha stotram

sanskritdocuments.org

November 25, 2018

ashvattha stotram

# અશ્વત્થસ્તોત્રમ્

## Sanskrit Document Information

Text title : ashvatthastotram.inf

File name : ashvatthastotram.itx

Category : deities_misc, stotra

Location : doc_deities_misc

Author : traditional

Transliterated by : Anuradha Anuraadha at cs.com

Proofread by : Anuradha Anuraadha at cs.com

Latest update : February 6, 2003

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 25, 2018

*sanskritdocuments.org*

# અશ્વત્થસ્તોત્રમ્

શ્રીનારદ ઉવાચ -
અનાયાસેન લોકોઽયમ્ સર્વાન્ કામાનવાપ્નુયાત્ ।
સર્વદેવાત્મકં ચૈકં તન્મે બ્રૂહિ પિતામહ ॥ ૧॥

બ્રહ્મોવાચ -
શ્રુણુ દેવ મુનેઽશ્વત્થં શુદ્ધં સર્વાત્મકં તરુમ્ ।
યત્પ્રદક્ષિણતો લોકઃ સર્વાન્ કામાન્ સમશ્નુતે ॥ ૨॥

અશ્વત્થાદ્દક્ષિણે રુદ્રઃ પશ્ચિમે વિષ્ણુરાસ્થિતઃ ।
બ્રહ્મા ચોત્તરદેશસ્થઃ પૂર્વેત્વિન્દ્રાદિદેવતાઃ ॥ ૩॥

સ્કન્ધોપસ્કન્ધપત્રેષુ ગોવિપ્રમુનયસ્તથા ।
મૂલં વેદાઃ પયો યજ્ઞાઃ સંસ્થિતા મુનિપુઙ્ગવ ॥ ૪॥

પૂર્વાદિદિક્ષુ સંયાતા નદીનદસરોઽબ્ધયઃ ।
તસ્માત્ સર્વપ્રયત્નેન હ્યશ્વત્થં સંશ્રયેદ્બુધઃ ॥ ૫॥

ત્વં ક્ષીર્યફલકશ્ચૈવ શીતલસ્ય વનસ્પતે ।
ત્વામારાધ્ય નરો વિન્ધ્યાદૈહિકામુષ્મિકં ફલમ્ ॥ ૬॥

ચલદ્દલાય વૃક્ષાય સર્વદાશ્રિતવિષ્ણવે ।
બોધિસત્વાય દેવાય હ્યશ્વત્થાય નમો નમઃ ॥ ૭॥

અશ્વત્થ યસ્માત્ ત્વયિ વૃક્ષરાજ નારાયણસ્તિષ્ઠતિ સર્વકાલે ।
અથઃ શ્રુતસ્ત્વં સતતં તરૂણાં ધન્યોઽસિ ચારિષ્ટવિનાશકોઽસિ ॥ ૮॥

ક્ષીરદસ્ત્વં ચ યેનેહ યેન શ્રીસ્ત્વાં નિષેવતે ।
સત્યેન તેન વૃક્ષેન્દ્ર મામપિ શ્રીર્નિષેવતામ્ ॥ ૯॥

એકાદશાત્મરુદ્રોઽસિ વસુનાથશિરોમણિઃ ।
નારાયણોઽસિ દેવાનાં વૃક્ષરાજોઽસિ પિપ્પલ ॥ ૧૦॥

અગ્નિગર્ભઃ શમીગર્ભો દેવગર્ભઃ પ્રજાપતિઃ ।
હિરણ્યગર્ભો ભૂગર્ભો યજ્ઞગર્ભો નમોઽસ્તુ તે ॥ ૧૧॥

આયુર્બલં યશો વર્ચઃ પ્રજાઃ પશુવસૂનિ ચ ।
બ્રહ્મ પ્રજ્ઞાં ચ મેધાં ચ ત્વં નો દેહિ વનસ્પતે ॥ ૧૨॥

સતતં વરુણો રક્ષેત્ ત્વામારાદ્દૃષ્ટિરાશ્રયેત્ ।
પરિતસ્ત્વાં નિષેવન્તાં તૃણાનિ સુખમસ્તુ તે ॥ ૧૩॥

અક્ષિસ્પન્દં ભુજસ્પન્દં દુઃસ્વપ્નં દુર્વિચિન્તનમ્ ।
શત્રૂણાં ચ સમુત્થાનં હ્યશ્વત્થ શમય પ્રભો ॥ ૧૪॥

અશ્વત્થાય વરેણ્યાય સર્વૈશ્વર્ય પ્રદાયિને ।
નમો દુઃસ્વપ્નનાશાય સુસ્વપ્નફલદાયિને ॥ ૧૫॥

મૂલતો બ્રહ્મરૂપાય મધ્યતો વિષ્ણુ રૂપિણે ।
અગ્રતઃ શિવરૂપાય વૃક્ષરાજાય તે નમઃ ॥ ૧૬॥

યં દૃષ્ટ્વા મુચ્યતે રોગૈઃ સ્પૃષ્ટ્વા પાપૈઃ પ્રમુચ્યતે ।
યદાશ્રયાચ્ચિરઞ્જીવી તમશ્વત્થં નમામ્યહમ્ ॥ ૧૭॥

અશ્વત્થ સુમહાભાગ સુભગ પ્રિયદર્શન ।
ઇષ્ટકામાંશ્ચ મે દેહિ શત્રુભ્યસ્તુ પરાભવમ્ ॥ ૧૮॥

આયુઃ પ્રજાં ધનં ધાન્યં સૌભાગ્યં સર્વસમ્પદમ્ ।
દેહિ દેવ મહાવૃક્ષ ત્વામહં શરણં ગતઃ ॥ ૧૯॥

ઋગ્યજુઃસામમન્ત્રાત્મા સર્વરૂપી પરાત્પરઃ ।
અશ્વત્થો વેદમૂલોઽસાવૃષિભિઃ પ્રોચ્યતે સદા ॥ ૨૦॥

બ્રહ્મહા ગુરુહા ચૈવ દરિદ્રો વ્યાધિપીડિતઃ ।
આવૃત્ય લક્ષસઙ્ખ્યં તત્ સ્તોત્રમેતત્ સુખી ભવેત્ ॥ ૨૧॥

બ્રહ્મચારી હવિષ્યાશી ત્વદઃશાયી જિતેન્દ્રિયઃ ।
પપોપહતચિત્તોઽપિ વ્રતમેતત્ સમાચરેત્ ॥ ૨૨॥

એકાહસ્તં દ્વિહસ્તં વા કુર્યાદ્ગોમયલેપનમ્ ।
અર્ચેત્ પુરુષસૂક્તેન પ્રણવેન વિશેષતઃ ॥ ૨૩॥

મૌની પ્રદક્ષિણં કુર્યાત્ પ્રાગુક્તફલભાગ્ભવેત્ ।
વિષ્ણોર્નામસહસ્રેણ હ્યચ્યુતસ્યાપિ કીર્તનાત્ ॥ ૨૪॥

પદે પદાન્તરં ગત્વા કરચેષ્ટાવિવર્જિતઃ ।
વાચા સ્તોત્રં મનો ધ્યાને ચતુરઙ્ગં પ્રદક્ષિણમ્ ॥ ૨૫॥

અશ્વત્થઃ સ્થાપિતો યેન તત્કુલં સ્થાપિતં તતઃ ।
ધનાયુષાં સમૃદ્ધિસ્તુ નરકાત્ તારયેત્ પિતૃન્ ॥ ૨૬॥

અશ્વત્થમૂલમાશ્રિત્ય શાકાન્નોદકદાનતઃ ।
એકસ્મિન્ ભોજિતે વિપ્રે કોટિબ્રાહ્મણભોજનમ્ ॥ ૨૭॥

અશ્વત્થમૂલમાશ્રિત્ય જપહોમસુરાર્ચનાત્ ।
અક્ષયં ફલમાપ્નોતિ બ્રહ્મણો વચનં યથા ॥ ૨૮॥

એવમાશ્વાસિતોઽશ્વત્થઃ સદાશ્વાસાય કલ્પતે ।
યજ્ઞાર્થં છેદિતેઽશ્વત્થે હ્યક્ષયં સ્વર્ગમાપ્નુયાત્ ॥ ૨૯॥

છિન્નો યેન વૃથાઽશ્વત્થશ્છેદિતા પિતૃદેવતાઃ ।
અશ્વત્થઃ પૂજિતો યત્ર પૂજિતાઃ સર્વદેવતાઃ ॥ ૩૦॥

॥ ઇતિ અશ્વત્થ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Anuradha AnurAdha at cs.com

*ashvattha stotram*

pdf was typeset on November 25, 2018

Please send corrections to *sanskrit@cheerful.com*